**डॉ. मीरा कुमारी**
**संस्कृत विभाग, सी. एम. जे. कॉलेज, खुटौना**
**ललित नारायण मिथिला विश्विद्यालय, दरभंगा, बिहार**
ईमेल आइडी - kmeera573@gmail.com
Mobile number- 6287538352

वर्ग- बीए पार्ट 3 (H) दिनांक - 23-07-2020

विषय- षष्ठम्-पत्रम् निबंध

## विद्वान् सर्वत्र पूज्यते

अस्मिन् खलु संसारे यद्यपि धनस्य महन्महत्वमस्ति। सर्वाणि कार्याणि धनेनैव सिध्यन्ति नात्र कस्यापि वैमत्यम्। अत:धनार्थी लोक: धनिनां समादरं करोति। परम् तेषाम् समादर: सर्वत्र न भवति। केवलं धनार्थिभि: परिचतै: वा तेषामादर: क्रियते न तु निरपेक्षै: अपरिचितै:वा। परं विदुषां समादर: सर्वकालं अपरिचितै: निरपेक्षैरपि क्रियते। विषयेऽस्मिन् शास्त्रकारा: व्यवस्थितक्रममित्थं स्मरन्ति। वित्तं बन्धुर्वय: कर्म विद्या भवति पंचमी । एतानि मान्यस्थानानि गरीयो यद् यदुत्तम।।

अयमत्र क्रम: वित्तेन लोके समादरो भवति ,परं यश्च बहूबन्धु: स धनवत: अधिकतर मादरं लभते। बहुबन्धूत्वं महद्बलम्। बिभेति लोक: तस्मात् भीतिसमुत्थ: एव बहुमान: लोकस्य। वय:प्रकर्षोऽपि बहुमानस्थानम्।

सधन: निर्धनो वा बंधुमान् अबन्धुर्वा स्यात् वयो वृद्ध: तस्य ज्ञानजन्यानुभववशात् सर्वै:सर्वत्र सर्व कालं स:पूज्यते।

यस्तु क्रियावान् पुरुष: स स्वकर्म भिरेव उन्नति उन्नतिमवनति वा आदरं अनादरं वा लभते यथोक्तम्-

व्रजत्यध:प्रयात्युच्चै: नर:स्वैरेव कर्मभि:। अध:कूपस्य खनक: ऊर्ध्वं प्रासादकारक:।

कर्मनिष्ठ: जन: श्रौतस्मार्तादिषु कर्मस्वेकाग्रचित्त: यथा मान्यते न तथा धनिक: नृपो वा ।

धनिकादिचतुर: समपेक्ष्य विदुष: बहुतर: समादर: भवति सर्व काले सर्वत्र च । नृप: केवलं तदधीनस्थै: प्रजाजनैरेव पूज्यते। परं विद्वान् यत्र कुत्रापि गतो भवति स्वदेशे विदेशे वा तत्रैव समाद्रियते पूज्यते च। तत्रेदं कारणं यद् विद्वान् स्वां विद्यां लोकस्य सर्वस्वोपकृतये शिवेतरक्षतये परनिवृत्तये च जानीते । विद्या खलु धर्म तत्त्वबोधिनी, धर्माऽधर्मौ न विजानाति लोक: विद्यया विना। विद्याधनं सर्वश्रेष्ठ धनं तन्मूलमितरद्धनम्।

इदंचानुदिनमक्षिलक्ष्यीक्रियते यद्भारतर्षीया: स्वनाम धन्या: श्री राधा कृष्णान् प्रभृतयो विद्वांस: हरिवर्षादिषु (इंग्लैंडादि) देशेषु बहु मन्यन्ते। तद्देशीयाश्च बर्नार्ड शा प्रभृत्तयो विद्वास:निर्व्याजं अत्र भारतेऽन्यत्रापि च पूजयन्ते। अत:सत्यमुक्तम्-

भगवता मनुना- स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च। तेषाम् तु समवेतानां मान्यौ स्नातकपार्थिवौ। राजस्नातकयोश्चैव स्नातको नृपमान्यभाक्।।

अतः-स्वदेशे पूज्यते राजा। विद्वान् सर्वत्र पूज्यते।।

इति साधूक्तमेवेति।